# Shri Krishna Ashtakam

# શ્રીકૃષ્ણાષ્ટકમ્

## Document Information

Text title : Shri Krishna Ashtakam

File name : shrIkRRiShNAShTakamshrIdharasvAmI2.itx

Category : vishhnu, shrIdharasvAmI, aShTaka, krishna, stotra

Location : doc_vishhnu

Author : Shridharasvami

Description/comments : shrIdharasvAmI stotraratnAkara

Acknowledge-Permission: Upendra Shripad Dasare, https://shridharamrut.com

Latest update : November 8, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 13, 2022

*sanskritdocuments.org*

Shri Krishna Ashtakam

# શ્રીકૃષ્ણાષ્ટકમ્

યદ્બ્રહ્મનિર્ગુણમિતિ શ્રુતયો વદન્તિ
    યદ્દિવ્યભક્તિવશગઃ સ્થિરસૌખ્યમેતિ ।
યસ્મિન્ સ્થિતે તુ ભવમેતિ પુનર્ન કશ્ચિત્
    તત્કૃષ્ણદિવ્યપદપઙ્કજમાશ્રયેહમ્ ॥ ૧॥

યસ્મિન્ન જીવજગદાદિકબન્ધજાલં
    બ્રહ્મૈવ યત્સ્વમહસૈવ સદા ચકાસ્તિ ।
યસ્મિન્ પરે સુખઘને ન વિભિન્નમીષત્
    તત્કૃષ્ણદિવ્યપદપઙ્કજમાશ્રયેહમ્ ॥ ૨॥

કાર્યં ન કારણમપીતિ ન યસ્ય કિઞ્ચિત્
    સ્વાનન્દમાત્રમિહ યત્પરિપૂર્ણમેકમ્ ।
માયા ન તત્સકલકાર્યમુદેતિ યસ્મિન્
    તત્કૃષ્ણાદિવ્યપદપઙ્કજમાશ્રયેહમ્ ॥ ૩॥

યન્નેતિ નેતિ વચનૈર્નિગમા અવોચુઃ
    નશ્યેન્ન યત્ક્વચિદિહાસ્ય વિનાશકત્વાત્ ।
યચ્છાશ્વતં વિતતમદ્વયચિત્સ્વરૂપં
    તત્કૃષ્ણદિવ્યપદપઙ્કજમાશ્રયેહમ્ ॥ ૪॥

યસ્મિન્ન કિલ્વિષમિદં કિલ દેહજાતં
    યસ્મિંસ્તથા ન ખલુ ભાતિ મનઃકૃતં યત્ ।
યસ્મિન્ન જન્મગુણકર્મજપાશબન્ધઃ
    તત્કૃષ્ણદિવ્યપદપઙ્કજમાશ્રયેહમ્ ॥ ૫॥

બ્રહ્માણ્ડમીદૃગથવા ન તથૈવ પિણ્ડં
    પુંસ્ત્રી તથા ચ પુરુષઃ પ્રકૃતિર્ન યત્ર ।
સર્વજ્ઞ ઈશ ઇતિ યત્ર ચ નૈવ જીવઃ
    તત્કૃષ્ણદિવ્યપદપઙ્કજમાશ્રયેહમ્ ॥ ૬॥

યન્મઙ્ગલં પરમહોખિલમઙ્ગલાનાં
    સત્યસ્યસત્યમિતિ યત્પ્રથિતં ચ વેદૈઃ ।
યત્સૌખ્યલેશત ઇમે ત્રિદશાશ્ચ ધન્યાઃ
    તત્કૃષ્ણદિવ્યપદપઙ્કજમાશ્રયેહમ્ ॥ ૭॥

યત્સર્વચેતનમહોઽપિ ન યત્ર સર્વં
    સ્વેનૈવ સર્વહૃદયેહમિતિ સ્ફુટં યત્ ।
જ્ઞાત્વા સ્વસૌખ્યમિતિ યન્મુનયો વિમુક્તાઃ
    તત્કૃષ્ણદિવ્યપદપઙ્કજમાશ્રયેહમ્ । ૮॥

ત્રૈલોક્યપાવની પુણ્યા મુક્તિદા કૃષ્ણસંસ્તુતિઃ ।
ભદ્રં તનોતુ લોકેષુ ગઙ્ગેવ કિલ સર્વદા ॥ ૯॥

ઇતિ શ્રીમત્ પરમહંસપરિવ્રાજકાચાર્ય સદ્ગુરૂ ભગવાન
શ્રીધરસ્વામીમહારાજવિરચિતં શ્રીકૃષ્ણાષ્ટકં સમ્પૂર્ણમ્ ।

રચનાકાળઃ શ્રીકૃષ્ણજન્માષ્ટમી, સંવત્સર- ૧૯૪૩
રચનાસ્થળઃ કૉફી ઉદ્યાન, ચિક્કમગળૂરુ

*Shri Krishna Ashtakam*

pdf was typeset on November 13, 2022

Please send corrections to *sanskrit@cheerful.com*